रोदनाश्रुप्रपतनान्मृतानां नरकं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २७ अध्यायः ॥

मृतमुद्दिश्य रोदननिषेधो यथा,—
“श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्य्या विधानतः ॥”
इति शुद्धितत्त्वम् ॥

रोदनिका, स्त्री, (रोदनं अश्रु पात्यत्वेनास्त्यस्येति । रोदन+ठन् ।) यवासः । इति राजनिर्घण्टः ॥ (विषयोऽस्य यवासशब्दे ज्ञातव्यः ॥)

रोदनी, स्त्री, (रुद्यतेऽनयेति । रुद्+करणे ल्युट् । ङीप् ।) दुरालभा । इत्यमरः । २ । ४ । ६२ ॥

रोदसी, स्त्री, (रोदस्+गौरादित्वात् ङीष् ।) स्वर्गः । भूमिः । इत्यमरः । ३ । ३ । २२८ ॥

रोदसी, य, स्वर्गः । भूमिः । यथा,—
“द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च ॥”
इति भरतधृतकोषः ॥

रोदस्यौ, स्त्री, भूमिस्वर्गौ । यथा,—
“प्रह्वरश्चापि भूद्यावौ रोदस्यौ रोदसी च ते ॥”
इत्यमरः । ३ । ३ । २२८ ॥

“भूर्भूमिः द्यौराकाशं एते सहिते विग्रहीते च रोदसीरोदःशब्दयोर्वाच्येते इति भूद्यावौ परान्त्येते एतेन ईवन्तसान्तशब्दद्वयेन एकवचनान्तेनापि भूद्यावौ समुदिते उच्येते ।
‘रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक् ।
सह प्रयोगेऽप्यनयो रोदः स्यादपि रोदसी ॥’
इति विश्वः ॥
‘रोदसी रोदसा सार्द्धं पृथ्वीस्वर्गौ दिवि स्थितौ ॥’
इत्यजयः ॥

रोदसीत्यव्ययमप्यस्ति । यथा । द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति चेति ।” इति तट्टीकायां भरतः ॥

रोधः, पुं, (रुणद्धि जलमिति । रुध्+पचाद्यच् ।) नदीतीरम् । इत्यमरटीकायां भरतः ।१।१०।७॥ (रुध्+घञ् । रोधनम् । यथा, मार्कण्डेये । १३ । १ ।
“अहं वैश्यकुले जातो जन्मन्यस्मात्तु सप्तमे ।
समतीते गवां रोधं निपाने कृतवान् पुरा ॥”)

रोधः, [स्] क्ली, (रुणद्धि वार्य्यादिकमिति । रुध+“सर्व्वधातुभ्योऽसुन् ।” उणा० ४ । १ ८८ । इति असुन् ।) नदीतीरम् । इत्यमरः । १ । १० । ७ ॥ (यथा, रघुः । ५ । ४२ ।
“स नर्म्मदारोधसि सीकरार्द्रै-
र्मरुद्भिरानर्त्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम् ॥”)

रोधनः, त्रि, (रुणद्धीति । रुध+ल्युः ।) रोधकर्त्ता । (रुध्+भावे ल्युट् ।) रोधे, क्ली । इति व्याकरणम् ॥ (यथा, भागवते । ३ । ३० । २७ ।
“पातनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्त्तयोः ॥”)

रोधवक्रा, स्त्री, (रोधेन वक्रा ।) नदी । यथा । निम्नगा रोधवक्रा च स्रवन्ती सिन्धुरापगेति नदीपर्य्याये भागुरिः । इति भरतः ॥

रोधोवक्रा, स्त्री, (रोधसा वक्रा ।) नदी । इति त्रिकाण्डशेषः ॥

रोधोवती, स्त्री, (रोधोऽस्त्यस्या इति । रोधस्+मतुप् । ङीप् ।) नदी । इति राजनिर्घण्टः ॥

रोध्रं, क्ली, (रुध्यतेऽनेन । रुध+बाहुलकात् रन् ।) अपराधः । पापम् । इति मेदिनी । रे, ८१ ॥

रोध्रः, पुं, लोध्रः । इति मेदिनी राजनिर्घण्टश्च ॥ (यथा, सुश्रुते । १ । १२ ।
“मधूच्छिष्टं समधुकं रोध्रं सर्ज्जरसं तथा ।
मञ्जिष्ठां चन्दनं मूर्व्वां पिष्ट्वा सर्पिर्विपाचयेत् ॥”)

रोध्रपुष्पः, पुं, (रोध्रस्येव पुष्पमस्य ।) मधूकवृक्षः । इति राजनिर्घण्टः ॥ (मण्डलिसर्पजातिविशेषः । तद्यथा ।“आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्पो मिलिन्दको गोनसः इत्यादिषु ।” इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

रोध्रपुष्पिणी, स्त्री, (रोध्र इव पुष्प्यतीति । पुष्प+णिनि । ङीप् ।) धातकीवृक्षः । इति राजनिर्घण्टः ॥

रोपः, पुं, (रुप्यतेऽनेनेति । रुप विमोहे+घञ् ।) बाणः । इत्यमरः ॥ (रुह+णिच्+घञ् ।) रोपणम् । इति मेदिनी । पे, २ ॥ (यथा, महाभारते । १३ । ५८ । २४ ।
“एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्विमे ॥”)
छिद्रे, क्ली । इति हेमचन्द्रः ॥

रोपणं, क्ली, विमोहनम् । रुपधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥ जननम् । प्रादुर्भावः । ण्यन्तरुहधातोः पडादेशे अनट्प्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । १५ ।
“सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मानुग्रहं करोति ॥”)
अञ्जनविशेषः । यथा,—
“रोपणं रसकं पिष्ट्वा सम्यक् संप्लाव्य वारिणा ।
गृह्णीयात्तज्जलं सर्व्वं त्यजेच्चूर्णमधोगतम् ॥
शुष्कञ्च तज्जलं सर्व्वं पर्पटीसन्निभं भवेत् ।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः ॥
कर्पूरस्य रसन्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयने तेन नेत्राखिलगदच्छिदः ॥”
इति भावप्रकाशः ॥
(त्रि, रोपकः । यथा, सुश्रुते । ६ । १८ ।
“लेखनात् त्रिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥”
व्रणरोगे मांसाङ्कुरजननार्थप्रक्रियादिकम् । तद्यथा,—
“आदौ विम्लापनं कुर्य्याद्द्वितीयमवसेचनम् ।
तृतीयमुपनाहञ्च चतुर्थीं पटलक्रियाम् ॥
पञ्चमं शोधनञ्चैव षष्ठं रोपणमिष्यते ।
एते क्रमा व्रणस्योक्ताः सप्तमो वै कृतापहः ॥
निम्बपत्रतिलैः कल्को मधुना चतशोधनः ।
रोपणः सर्पिषा युक्तो यवकल्केऽप्ययं विधिः ॥”
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)

रोपणचूर्णं, क्ली, (रोपणस्य चूर्णम् ।) नयनाञ्जनविशेषः । यथा, भावप्रकाशे ।

अथ रोपणचूर्णम् ।
“शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा ।
गृह्णीयात् तज्जलं सर्व्वं त्यजेच्चूर्णमधोगतम् ॥
शुष्कं तच्च जलं सर्व्वं पर्पटीसन्निभं भवेत् ।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः ॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयनं तेन सर्व्वदोषोपशान्तये ॥
समस्तनेत्ररोगघ्नं चूर्णमेतन्न संशयः ॥”

रोपणीवर्त्तिः, स्त्री, नेत्राञ्जनभेदः । यथा । अथ रोपणीवर्त्तिः ।
“अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः ।
जातीपुष्पाणि पञ्चाशन्मरिचानि च षोड़श ॥
सूक्ष्मं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा ।
तिमिरार्ज्जुनशुक्राणां नाशिनी मांसवृद्धिनुत् ।
एतस्या अञ्जने प्रोक्ता मात्रा सार्द्धहरेणुका ॥”
कुसुमिकावटी रोपणी । इति भावप्रकाशः ॥

रोप्यातिरोप्यः, पुं, धान्यविशेषः । अस्य गुणाः ।
“रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः ।
अदाहिनो दोषहरा बल्या मूत्रविवर्द्धनाः ॥”
इति राजवल्लभः ॥

रोमं, क्ली, जलम् । इति शब्दचन्द्रिका ॥ (लोम । यथा, महाभारते । ३ । ११२ । ३ ।
“द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च ॥”
जनपदविशेषः । इति केचित् ॥)

रोम, [न्] क्ली, (रौतीति । रु+“नामन्सीमन्व्योमन्रोमन्निति ।” उणा० ४ । १५० । इति मनिन्प्रत्ययेन साधुः ।) शरीरजाताङ्कुरः । रोँया इति भाषा । तत्पर्य्यायः । लोम २ अङ्गजम् ३ त्वग्जम् ४ चर्म्मजम् ५ तनूरुहम् ६ । इति राजनिर्घण्टः ॥ स्थानविशेषे तस्य शुभाशुभसूचकत्वं यथा,—
“अल्परोमयुता श्रेष्ठा जङ्घा हस्तिकरोपमा ।
रोमैकैकं कूपके स्यान्नृपाणान्तु महात्मनाम् ॥
द्वे द्वे रोमे पण्डितानां श्रोत्रियाणान्तथैव च ।
रोमत्रयं दरिद्राणां रोगी निर्म्मांसजानुकः ॥”
इति गारुड़े ६३ अध्यायः ॥

रहस्यरोम्णोऽस्पृश्यत्वं यथा,—
“न सर्पशस्त्रैः क्रीड़ेत स्वानि खानि न संस्पृशेत् ।
रोमाणि च रहस्यानि नाशिष्टेन सहा व्रजेत् ॥”
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
(जनपदविशेषः । तद्देशवासिनि । पुं भूम्नि । यथा, महाभारते । ६ । ६ । ५५ ।
“वानायवो दशाःपार्श्वा रोमाणः कुशविन्दवः ॥”)

रोमकं, क्ली, (रोमे कायतीति । कै+कः ।) पांशुलवणम् । (यथा, सुश्रुते । १ । ४२ ।
“सैन्धवसौवर्च्चलविड़पाक्यरोमकसामुद्रकपक्त्रिमयवक्षारोषप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः ॥”) अयस्कान्तभेदः । इति राजनिर्घण्टः ॥ (रोमैव । जनपदविशेषः । तद्देशवासिनि, पुं भूम्नि । यथा, महाभारते ।२।५०।१५।
“औष्णीकानन्तवासांश्च रोमकान् पुरुषादकान् ॥”)